६

348sk06

रघुवंशम्- राज्ञो दिलीपस्य गुणवर्णनम् - २

प्रस्तावना

अस्मिन् पाठे वयं तदनन्तरम् एकादश श्लोकान् पठामः। अत्र कविः प्रथमतः सूर्यवंशीयस्य महाराजदिलीपस्य प्रजावात्सल्यं वर्णयति। ततः च एकैकशः दिलीपे ये राजोचिताः गुणाः आसन् तान् गुणान् वर्णयति। ततः दिलीपस्य पत्न्याः नामोल्लेखं कृत्वा तस्याः गुणवर्णनं करोति। तयोः दिलीपसुदक्षिणयोः विवाहात् परं बहूनि वर्षाणि व्यतीतानि। तथापि दिलीपस्य सन्तानप्राप्तिः न अभवत्। अतः सन्तानाभावात् दिलीपः अतीव दुःखितः आसीत्। एवं सन्तानलाभाय शास्त्रविहितम् अनुष्ठानादिकं करणीयम् इति चिन्तयित्वा स समग्रस्य राज्यस्य भारं मन्त्रिभ्यः प्रदत्तवान्।

उद्देश्यानि

अमुं पाठं पठित्वा भवान्-

- दिलीपस्य प्रजावात्सल्यं जानीयात्।
- तस्य अपरान् च लोकोत्तरगुणान् अवगच्छेत्।
- दिलीपः कथं राज्यभारं मन्त्रिभ्यः प्रदत्तवान् इति बोद्धुं शक्नुयात्।
- दिलीपस्य पत्नीविषये ज्ञातुं पारयेत्।
- प्रत्येकं श्लोकानाम् अन्वयादिकं जानीयात्।
- समासादीन् व्याकरणविषयान् अपि बोद्धुं शक्नुयात्।

६.१) मूलपाठः -

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।

स पिता पितरस्तासां केवलं जन्महेतवः।।२४।।

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये।

अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।।२५।।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।

संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।२६।।

न किलानुययुस्तस्य राजानो रक्षितुर्यशः।

व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता।।२७।।

द्वेष्योऽपि संमतः शिष्टस्तस्यार्तस्य यथौषधम्।

त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता।।२८।।

तं वेधा विदधे नूनं महाभूतसमाधिना।

तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः।।२९।।

स वेलावप्रवलयां परिखीकृतसागराम्।

अनन्यशासनामूर्वीं शशासैकपुरीमिव।।३०।।

तस्य दाक्षिण्यरुढेन नाम्ना मगधवंशजा।

पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।३१।।

कलत्रवन्तमात्मानमवरोधे महत्यपि।

तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः।।३२।।

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।

विलम्बितफलैः कालं स निनाय मनोरथैः।।३३।।

सन्तानार्थाय विधये स्वभुजादवतारिता।

तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे।।३४।।

६.२) इदानीं मूलपाठम् अवगच्छाम -

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।

स पिता पितरस्तासां केवलं जन्महेतवः।।२४।।

अन्वयः - प्रजानां विनयाधानात् रक्षणात् भरणात् अपि स पिता (आसीत्)। तासां पितरस्तु केवलं जन्महेतवः।

अन्वयार्थः - प्रजानां जनानां विनयाधानात् शिक्षाकारणात् रक्षणात् पालनात् भरणात् अपि पोषणात् अपि सः दिलीपः पिता पितृस्थानीयः आसीत्। तासां पितरः तु जनकाः तु जन्महेतवः जननकारणानि केवलम् एव।

सरलार्थः - प्रजाभ्यः शिक्षाप्रदानं तासां रक्षणभरणादिकं सर्वं दिलीपः एव करोति स्म। अतः पितृकार्यकरणात् स प्रजानां पिता सञ्जातः। तासां प्रकृताः जनकाः केवलं जन्मकारणानि आसन्।

तात्पर्यार्थः - यः पालयति स पिता भवति। स एव पुत्राय उपयुक्तां शिक्षां प्रदाय तं सन्मार्गे प्रवर्तयति। जनकः पुत्रस्य रक्षणं भरणं पोषणं च करोति। दिलीपस्य राज्ये जनानां जन्म प्रति एव तेषां

पितरः हेतवः आसन्। प्रकृतं पितृकार्यं तु दिलीपः करोति स्म। यतः स एव प्रजानां शिक्षाव्यवस्थां पश्यति स्म। जनाः विपद्ग्रस्ताः चेत् स एव तान् रक्षति स्म। अन्नपानादिभिः विषयैः स एव तान् यथार्थं पालयति स्म। वस्तुतः यः प्रकृतः राजा भवति स इत्थम् एव स्वराज्यं चालयति। अनेन दिलीपः यथार्थः प्रजापालकः राजा आसीत् इति सुष्ठु अवगम्यते। अतः दिलीपस्य राज्ये पितरः जननकारणमात्राणि आसन्। तेषां प्रकृतः जनकः तु स्वयं राजा दिलीपः एव आसीत्।

व्याकरणविमर्शः -

- विनयाधानात् - विनयस्य आधानं विनयाधानम् इति षष्ठीतत्पुरुषसमासः, तस्मात् विनयाधानात्।
- जन्महेतवः - जन्मनः हेतवः जन्महेतवः इति षष्ठीतत्पुरुषसमासः।

सन्धिकार्याणि -

- विनयाधानाद्रक्षणाद्भरणादपि - विनयाधानात्+रक्षणात्+भरणात्+अपि
- पितरस्तासाम् -पितरः+तासाम्
- **प्रयोगपरिवर्तनम्** - प्रजानां विनयाधानात् रक्षणात् भरणात् अपि तेन पित्रा अभूयत। तासां पितृभिः तु केवलं जन्महेतुभिः अभूयत।

पाठगतप्रश्नाः -१

१. दिलीपः कथं प्रजानां पिता।

२. जनानां पितरः के आसन्.।

३. विनयाधानात् इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

४. प्रजानां पितरः के आसन् -

१) मृत्युहेतवः २) वृद्धिहेतवः ३) जन्महेतवः ४) दोषहेतवः

६.३) इदानीं मूलपाठम् अवगच्छाम -

स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः।।२५।।

अन्वयः - दण्ड्यान् स्थित्यै दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामौ अपि धर्म एव आस्ताम्।

अन्वयार्थः - दण्ड्यान् दण्डनीयान् स्थित्यै लोकमर्यादायै दण्डयतः तेभ्यः दण्डं यच्छतः प्रसूतये सन्तानाय परिणेतुः विवाहं कुर्वतः तस्य दिलीपस्य अर्थकामौ एतन्नामकौ द्वौ पुरुषार्थौ अपि धर्म एव धर्मनामकपुरुषार्थ एव आस्ताम् अभवताम्।

सरलार्थः - लोककल्याणाय दिलीपः दण्डयोग्यान् अदण्डयत्। पुत्रोत्पादनाय स विवाहम् अकरोत्। एवं तस्य अर्थः कामः इति द्वौ पुरुषार्थौ धर्मस्वरूपौ एव आस्ताम्।

तात्पर्यार्थः - महाराजः दिलीपः जगतः हिताय दण्ड्यान् दण्डयति स्म। तत्र धनसंग्रहः तस्य उद्देश्यं न आसीत्। लोके प्रायः दण्डं धनसंग्रहाय प्रयुज्ञते जनाः। किन्तु दिलीपः तेन एव दण्डेन लोककल्याणरूपं धर्मं साधितवान्। अतः तस्य अर्थसाधनं धर्मम् एव साधयति इति प्राप्तम्। जगति प्रायः जनाः कामेन वशीभूताः भवन्ति। तस्य कामस्य शान्तये एव ते विवाहं कुर्वन्ति। किन्तु दिलीपः भोगाय विवाहं न कृतवान्। अपि तु सन्तानम् उत्पादयितुं परिणीतवान्। अनेन स पितृणम् अपि पूरितवान्। लोके भोगाय एव विवहन्ति जनाः। किन्तु अत्र तु परिणयेन पितृणपूरणरूपः धर्मः एव साधितः भवति। अतः दिलीपस्य कामसाधनम् अपि धर्मम् एव साधयति स्म। एवं दिलीपस्य अर्थकामौ अपि धर्मपरतां प्राप्तवन्तौ। अनेन तस्य सर्वं कार्यं धर्मपरकम् एव आसीत् इति वर्णयति कविः।

व्याकरणविमर्शः -

- दण्डयतः - दण्ड्धातोः णिचि निष्पन्नात् दण्डिधातोः शतृप्रत्यये दण्डयत् इति प्रातिपदिकं भवति। तस्य षष्ठ्येकवचनविवक्षायां दण्डयतः इति रूपम्।
- दण्ड्यान् - दण्डम् अर्हन्ति इति दण्ड्याः, तान् दण्ड्यान्। द्वितीयाबहुवचनान्तम् इदं पदम्।
- अर्थकामौ - अर्थः च कामः च अर्थकामौ इति इतरेतरयोगद्वन्द्वसमासः।

सन्धिकार्यम् -

- दण्डयतो दण्ड्यान् - दण्डयतः+दण्ड्यान्
- अप्यर्थकामौ - अपि+अर्थकामौ
- तस्यास्ताम् - तस्याः+ताम्
- धर्म एव - धर्मः+एव
- **प्रयोगपरिवर्तनम्** - दण्ड्यान् स्थित्यै दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामाभ्यां अपि धर्मेण एव अभूयत।

पाठगतप्रश्नाः -२

५. दिलीपः दण्ड्यान् कथं दण्डितवान्।

६. दिलीपस्य अर्थकामौ कः आसीत्।

७. दण्डयतः इति कस्य प्रातिपदिकस्य रूपम्। तत् कस्याः विभक्तेः कस्मिन् वचने भवति।

८. दिलीपस्य अर्थकामौ किम् आसीत् –

१) धर्मः २) अर्थः ३) कामः ४) मोक्षः

६.४) इदानीं मूलपाठम् अवगच्छाम -

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।

सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।२६।।

अन्वयः- स यज्ञाय गां दुदोह, मघवा सस्याय दिवं दुदोह। (एवम्) उभौ सम्पद्विनिमयेन भुवनद्वयं दधतुः।

अन्वयार्थः - स राजा दिलीपः यज्ञाय यज्ञं कर्तुं गां पृथिवीं दुदोह दुग्धवान्। मघवा देवराजः इन्द्रः सस्याय धान्याय दिवं स्वर्गं दुदोह दुग्धवान्। उभौ दिलीपदेवेन्द्रौ सम्पद्विनिमयेन परस्परं सम्पत्त्याः विनिमयेन भुवनद्वयं लोकद्वयं दधतुः पोषितवन्तौ।

सरलार्थः - दिलीपः यज्ञेन स्वर्गस्थान् देवान् प्रसादयितुं प्रजाभ्यः करं स्वीकृतवान्। देवराजः इन्द्रः च स्वर्गलोकात् पृथिवीलोके वर्षणं कृतवान्। एवं परस्परं सम्पद्विनिमयेन उभौ लोकद्वयं पोषितवन्तौ।

तात्पर्यार्थः - दिलीपेन सह देवराजस्य इन्द्रस्य सख्यता आसीत्। अतः तयोः मध्ये सम्पद्विनिमयः अभवत्। दिलीपः देवानां प्रसादाय यज्ञादिकम् अकरोत्। तदर्थं स प्रजाभ्यः करं गृह्णाति स्म। कररूपेण यद् धनं संगृह्णाति स्म तेन एव देवयज्ञं करोति स्म। अतः दिलीपः यज्ञाय गां दुदोह इति वर्णयति कविः। तेन च यज्ञेन सन्तुष्टः भूत्वा इन्द्रः पृथिव्यां वर्षणम् अकरोत्। तेन धरणी सस्यायिता भवति स्म। तेभ्यः एव सस्येभ्यः जनाः धनार्जनं कृत्वा करं ददति स्म। एवं दिलीपः यज्ञादिना स्वर्गं पोषितवान्। देवराजः इन्द्रः वर्षणेन पृथिवीं पोषितवान्। एवम् उभौ परस्परं परिपोषकौ भूत्वा पृथिवीं स्वर्गं च पालितवन्तौ।

व्याकरणविमर्शः -

- दुदोह - दुह्-धातोः लिट्लकारे प्रथमपुरुषैकवचने दुदोह इति रूपम्। दुग्धवान् इत्यर्थः।
- सम्पद्विनिमयेन - सम्पदः विनिमयः सम्पद्विनिमयः इति षष्ठीतत्पुरुषसमासः, तेन सम्पद्विनिमयेन।
- दधतुः - धा-धातोः लिट्लकारे प्रथमपुरुषद्विवचने दधतुः इति रुपम्। पोषितवन्तौ इत्यर्थः।
- भुवनद्वयम् - भुवनयोः द्वयं भुवनद्वयम् इति षष्ठीतत्पुरुषसमासः।

सन्धिकार्यम् -

- सम्पद्विनिमयेनोभौ - सम्पद्विनिमयेन+उभौ
- दधतुर्भुवनद्वयम् - दधतुः+भुवनद्वयम्
- **प्रयोगपरिवर्तनम्** - तेन यज्ञाय गौः मघोना सस्याय द्यौः दुदुहे। (एवम्) उभाभ्यां सम्पद्विनिमयेन

भुवनद्वयं दधे।

पाठगतप्रश्नाः -३

९. दिलीपः कथं पृथिवीं दुग्धवान्।

१०. भुवनद्वयं नाम किम्।

११. दुदोह इति रूपं कस्य धातोः कस्मिन् लकारे भवति।

१२. दिलीपः केन साकं सम्पद्विनिमयं कृतवान् –

१) बलिना २) वरुणेन ३) सूर्येण ४) इन्द्रेण

६.५) इदानीं मूलपाठम् अवगच्छाम -

न किलानुययुस्तस्य राजानो रक्षितुर्यशः।

व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता।।२७।।

अन्वयः - राजानः रक्षितुः तस्य यशो न अनुययुः किल। यत् तस्करता परस्वेभ्यो व्यावृत्ता (सती) श्रुतौ स्थिता।

अन्वयार्थः - राजानः अन्ये नृपाः रक्षितुः रक्षकस्य तस्य दिलीपस्य यशः कीर्तिः न अनुययुः न अनुकृतवन्तः किल खलु। यत् यतः तस्करता चौर्यं परस्वेभ्यः अन्यद्रव्येभ्यः व्यावृत्ता निवृत्ता सती श्रुतौ शब्दे स्थिता आसीत्।

सरलार्थः - दिलीपस्य राज्ये कोपि तस्करः नासीत्। तस्करता केवलं शब्दरूपेण श्रूयते स्म। वास्तविकतया तस्करता तत्र नासीत्। अतः अन्ये राजानः दिलीपस्य यशः न अनुकृतवान्।

तात्पर्यार्थः - जगति अन्येषु नृपेषु दिलीपः विलक्षणः आसीत्। शासनकाले स प्रजानां मानसिकीं प्रवृत्तिम् एव परिवर्तितवान्। तस्मात् कारणात् दिलीपस्य राज्ये कोपि जनः चौरः नासीत्। न केवलम् एतत्, अपि तु तस्करता एव समाजे नासीत्। पूर्वकाले या तस्करता परधनेषु आसीत् इदानीं सा तत्र नास्ति। जनाः केवलं तस्करताशब्दं श्रुतवन्तः किन्तु कथं भवति सा इति कदापि न अनुभूतवन्तः। शशशृङ्गम् इव तत् अलीकम् आसीत्। अतः तस्करताशब्दमात्रं दिलीपस्य राज्ये आसीत् इति वर्णयति कविः। अतः एव पार्श्ववर्तिनः अन्ये नृपाः ईर्ष्यान्विताः भवन्ति स्म। ते तस्य यशः अनुकर्तुं प्रचेष्टाम् अपि कृतवन्तः। किन्तु दिलीपस्य तादृशीं कीर्तिम् अनुकर्तुं ते समर्थाः न अभवन्।

व्याकरणविमर्शः -

- अनुययुः - अनु-पूर्वकात् याधातोः लिटि प्रथमपुरुषबहुवचनविवक्षायां अनुययुः इति रुपम्।

अनुकृतवन्तः इत्यर्थः।

- व्यावृत्ता - विपूर्वकात् आङ्पूर्वकात् वृत्-धातोः क्तप्रत्यये व्यावृत्त इति रूपम्। ततः स्त्रियां टाप्प्रत्यये व्यावृत्ता इति रूपम्।
- परस्वेभ्यः - परेषां स्वानि परस्वानि इति षष्ठीतत्पुरुषसमासः, तेभ्यः परस्वेभ्यः।
- तस्करता - तस्करस्य भावः तस्करता। अत्र तस्करशब्दात् तल्प्रत्ययः कृतः।

सन्धिकार्यम्-

- किलानुययुस्तस्य - किल+अनुययुः+तस्य
- राजानो रक्षितुर्यशः - राजानः+रक्षितुः+यशः
- **प्रयोगपरिवर्तनम्** - राजभिः रक्षितुः तस्य यशः न अनुयये किल। यत् तस्करतया परस्वेभ्यः व्यावृत्तया (सत्या) श्रुतौ स्थितम्।

पाठगतप्रश्नाः -४

१३. दिलीपस्य राज्ये तस्करता कुत्र आसीत्।

१४. अनुययुः इति कस्य धातोः कस्मिन् लकारे भवति। कः च तस्य अर्थः।

१५. किलानुययुस्तस्य इत्यत्र सन्धिविच्छेदं कुरुत।

६.६) इदानीं मूलपाठम् अवगच्छाम -

द्वेष्योपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोप्यासीदङ्गुलीवोरगक्षता।।२८।।

अन्वयः - शिष्टः द्वेष्यः अपि आर्त्तस्य औषधं यथा तस्य सम्मतः (आसीत्)। दुष्टः प्रियः अपि उरगक्षता अङ्गुली इव तस्य त्याज्यः आसीत्।

अन्वयार्थः - शिष्टः सज्जनः द्वेष्यः अपि शत्रुः अपि आर्त्तस्य रोगिणः औषधं यथा भेषजम् इव तस्य दिलीपस्य सम्मतः अनुमतः आसीत्। दुष्टः दुर्जनः प्रियः अपि आत्मीयः अपि उरगक्षता सर्पेण दष्टा अङ्गुली इव अङ्गुलीवत् तस्य दिलीपस्य त्याज्यः त्यागयोग्यः आसीत् अभवत्।

सरलार्थः - सच्चरित्रशाली जनः शत्रुः अपि दिलीपेन ग्रहणीयः आसीत् यथा रोगिणा औषधं ग्रहणीयं भवति। दुर्जनः आत्मीयः अपि दिलीपेन त्याज्यः आसीत् यथा सर्पेण दष्टा अङ्गुली त्यक्तव्या भवति।

तात्पर्यार्थः - जगति स्थितानां सर्वेषाम् एव जनानां केचन शत्रवः भवन्ति, केचन च बन्धवः भवन्ति। जनाः कारणं विना एव शत्रुभिः साकं कलहायन्ते। किन्तु सुहृदः दुष्टम् आचरन्ति चेत् अपि तैः साकं मित्रत्वं स्थापयन्ति। किन्तु दिलीपस्य स्वभावः तथा नासीत्। औषधं सदा एव रुचिरहितं भवति। तथापि रोगिणा तत् ग्राह्यं भवति। अन्यथा रोगोपशमः न सम्भवति। एवं शत्रुः अपि सत्कार्यम् आचरति चेत् स दिलीपेन आद्रियते स्म। शत्रुत्वम् आश्रित्य दिलीपः तं न त्यजति स्म। सर्पेण दष्टा अङ्गुली प्रिया भवति। तथापि सा त्यक्तव्या भवति। अन्यथा जनस्य मरणम् एव सम्भवति। एवम् आत्मीयः अपि दुष्टाचरणम् अकरोत् चेत् दिलीपः तेन सह सम्बन्धं नाशयति स्म। एवं सच्चरित्रशाली एव दिलीपस्य मित्रम् आसीत्। दुश्चरित्रशाली च दिलीपस्य शत्रुः आसीत् इति आगच्छति। कारणान्तरेण जातस्य शत्रुत्वस्य कारणान्तरेण जातस्य मित्रत्वस्य च नासीत् किञ्चिद् अपि स्थानम्।

व्याकरणविमर्शः -

- द्वेष्यः - द्वेष्टुं योग्यः इत्यर्थे द्विष्-धातोः ण्यत्प्रत्यये द्वेष्यः इति रूपम्। द्वेषयोग्यः इत्यर्थः।
- सम्मतः - सम्पूर्वकात् मन्-धातोः क्तप्रत्यये सम्मतः इति रूपम्।
- त्याज्यः - त्यक्तुं योग्यः इत्यर्थे त्यज्-धातोः ण्यत्प्रत्यये त्याज्यः इति रूपम्।
- उरगक्षता - उरगेण क्षता उरगक्षता इति तृतीयातत्पुरुषसमासः। उरगः नाम सर्पः।

सन्धिकार्यम् -

- द्वेष्योपि - द्वेष्यः+अपि
- शिष्टस्तस्यार्त्तस्य – शिष्टः+तस्य+आर्त्तस्य
- यथौषधम् - यथा+औषधम्
- त्याज्यो दुष्टः - त्याज्यः+दुष्टः
- प्रियोप्यासीदङ्गुलीवोरगक्षता - प्रियः+अपि+आसीत्+अङ्गुली+इव+उरगक्षता
- **प्रयोगपरिवर्तनम्** - शिष्टेन द्वेष्येण अपि आर्त्तस्य औषधेन यथा तस्य सम्मतेन अभूयत। दुष्टेन प्रियेण अपि उरगक्षतया अङ्गुल्या इव तस्य त्याज्येन अभूयत।

अलङ्कारालोचना - अस्मिन् श्लोके शिष्टः शत्रुः औषधेन उपमितः। दुष्टः प्रियः च उरगक्षतया अङ्गुल्या उपमितः। अतः अत्र शिष्टः शत्रुः दुष्टः प्रियः च उपमेयवाचकौ। औषधः सर्पदष्टा अङ्गुली च उपमानवाचकौ। इव इति उपमावाचकः शब्दः च वर्तते। यथा औषधं ग्रहणीयं तथा शिष्टः शत्रुः ग्राह्यः। यथा सर्पदष्टा अङ्गुली त्याज्या तथा दुष्टः प्रियः अपि त्याज्यः इति सादृश्यम्। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -५

१६. दिलीपस्य शत्रुः अपि शिष्टः चेत् कथम् आसीत्।

१७. दिलीपस्य आत्मीयः अपि दुष्टः चेत् कथम् आसीत्।

१८. प्रियोप्यासीदङ्गुलीवोरगक्षता इत्यत्र सन्धिविच्छेदं कुरुत।

१९. उरगः नाम किम् -

१) पक्षी २) सर्पः ३) मार्जारः ४) इन्दुरः

६.७) इदानीं मूलपाठम् अवगच्छाम -

तं वेधा विदधे नूनं महाभूतसमाधिना।
तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः।।२९।।

अन्वयः - वेधाः तं महाभूतसमाधिना विदधे नूनम्। तथा हि तस्य सर्वे गुणाः परार्थैकफला आसन्।

अन्वयार्थः - वेधाः ब्रह्मा तं दिलीपं महाभूतसमाधिना पृथिव्यादिभिः महाभूतकारणसामग्रीभिः विदधे सृष्टवान् नूनम् अवश्यम्। तथा हि तस्य दिलीपस्य सर्वे सकलाः गुणाः परार्थैकफलाः अन्यस्य प्रयोजनं साधयन्तः आसन् अभवन्।

सरलार्थः - ब्रह्मा पञ्च महाभूतानि यैः उपकरणैः सृष्टवान् तैः एव उपकरणैः दिलीपम् अपि सृष्टवान्। अतः यथा पञ्च महाभूतानि परार्थं सन्ति तथा दिलीपस्य सर्वे गुणाः परार्थमेव आसन्।

तात्पर्यार्थः - अस्मिन् श्लोके कविः दिलीपस्य परोपकारितां वर्णयति। पृथिवी जलं तेजः वायुः आकाशम् इति पञ्च महाभूतानि भवन्ति। एतैः एव विधाता जगत् सृष्टवान्। एतेषां पञ्चमहाभूतानां यथाक्रमं गन्धः रसः रूपं स्पर्शः शब्दः एते पञ्च गुणाः सन्ति। गन्धः स्वयं गन्धं न स्वीकरोति। किन्तु गन्धेन अन्ये आनन्दिताः भवन्ति। रसः स्वयं रसं न गृह्णाति। किन्तु अन्ये रसं गृहीत्वा मोदिताः भवन्ति। एवम् एते गुणाः अन्येषां प्रयोजनम् एव साधयन्ति। एताभिः महाभूतानां सामग्रीभिः दिलीपम् अपि सृष्टवान् भगवान्। अतः यथा महाभूतानां कारणानि गन्धादीनि परार्थं साधयन्ति तथा दिलीपस्य प्रत्येकं कार्यं परार्थम् आसीत्। स सम्पूर्णम् अपि जीवनं परप्रयोजनसिद्धये एव नियुक्तवान्। तेन स यथार्थः परोपकारी सञ्जातः। तस्मादेव तस्य सर्वे गुणाः परार्थैकफला इति वर्णयति कविः।

व्याकरणविमर्शः -

- विदधे - विपूर्वकात् धाधातोः लिटि प्रथमपुरुषैकवचने विदधे इति रूपम्। विहितवान् इत्यर्थः।
- महाभूतसमाधिना - महान्ति च तानि भूतानि महाभूतानि इति कर्मधारयसमासः। महाभूतानां समाधिः महाभूतसमाधिः इति षष्ठीतत्पुरुषसमासः, तेन महाभूतसमाधिना। इदं तृतीयैकवचनान्तं रूपम्।
- परार्थैकफलाः - परस्य अर्थः परार्थः इति षष्ठीतत्पुरुषसमासः। परार्थ एव एकं फलं येषां ते परार्थैकफलाः इति बहुव्रीहिसमासः।

सन्धिकार्यम् -

- तस्यासन् - तस्य+आसन्
- परार्थैकफला गुणाः - परार्थैकफलाः+गुणाः
- **प्रयोगपरिवर्तनम्** - वेधसा स महाभूतसमाधिना विदधे नूनम्। तथा हि तस्य सर्वैः गुणैः परार्थैकफलैः अभूयत।

पाठगतप्रश्नाः -६

२०. दिलीपस्य सर्वे गुणाः कथं परार्थैकफलाः।

२१. विदधे इति रूपं कस्य धातोः कस्मिन् लकारे भवति।

२२. महाभूतसमाधिना इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

६.८) इदानीं मूलपाठम् अवगच्छाम -

स वेलावप्रवलयां परिखीकृतसागराम्।
अनन्यशासनामुर्वी शशासैकपुरीमिव।।३०।।

अन्वयः - स वेलावप्रवलयां परिखीकृतसागराम् अनन्यशासनाम् उर्वीम् एकपुरीम् इव शशास।

अन्वयार्थः - स राजा दिलीपः वेलावप्रवलयां समुद्रतटरूपेण प्राकारेण वेष्टितां परिखीकृतसागराम् खेयीकृतः सागरः यया ताम् अनन्यशासनाम् अपरनृपशासनरहिताम् उर्वीं पृथिवीम् एकपुरीम् इव एकनगरीम् इव शशास शासितवान्।

सरलार्थः - समुद्रतटं दिलीपस्य राज्यस्य प्राकारतुल्यम् आसीत्। समुद्रः च तस्य राज्यस्य परिखा आसीत्। पृथिव्याम् अन्यस्य कस्यापि शासनं नासीत्। एवं समग्रां पृथिवीं दिलीपः एकपूरीम् इव शासितवान्।

तात्पर्यार्थः - प्रत्येकराज्यस्य राजानः राज्यस्य रक्षणाय कांश्चन उपायान् करोति। यथा राज्यस्य सीमान्ते प्राकारं निर्मान्ति। प्राकारस्य बहिः परिखाः खनन्ति। किन्तु दिलीपः निजराज्यस्य रक्षणाय कमपि प्राकारं न निर्मीतवान्। सागरतटः स्वतः एव तस्य राज्यस्य प्राकारः सञ्जातः। एवमेव तेन परिखाः अपि न खनिताः। समुद्रः एव तस्य सुविशालस्य राज्यस्य परिखास्वरूपः आसीत्। एतेन एव अवगम्यते यद् दिलीपस्य राज्यम् समुद्रपर्यन्तम् आसीत्। अर्थात् सम्पूर्णा एव धरणी तस्य राज्ये अन्तर्भवति स्म। अतः दिलीपं विना अन्यस्य कस्य अपि नृपस्य शासनं पृथिव्यां नासीत् इति सुष्ठु

अवगम्यते। यथा एकः नृपः एकं नगरं शास्ति तथा दिलीपः सम्पूर्णाम् अपि पृथ्वीम् एकनगरीम् इव शासितवान्।

व्याकरणविमर्शः -

- वेलावप्रवलयाम् - वप्राणां वलयाः वप्रवलयाः इति षष्ठीतत्पुरुषसमासः। वेला एव वप्रवलयाः यस्याः सा वेलावप्रवलया इति बहुव्रीहिसमासः,तां वेलावप्रवलयाम्।
- परिखीकृतसागराम् - अपरिखाः परिखाः यथा सम्पद्यन्ते तथा कृताः इति विग्रहे च्विप्रत्यये परिखीकृताः इति रुपम्। परिखीकृताः सागराः यस्याः सा परिखीकृतसागराः इति बहुव्रीहिसमासः, तां परिखीकृतसागरम्।
- अनन्यशासनाम् - अन्यस्य शासनम् अन्यशासनम् इति षष्ठीतत्पुरुषसमासः। अविद्यमानम् अन्यशासनं यस्या सा अनन्यशासना इति नञ्बहुव्रीहिसमासः, ताम् अनन्यशासनाम्।
- शशास - शास्-धातोः लिटि प्रथमपुरुषैकवचने शशास इति रूपम्।
- एकपुरीम् - एका च असौ पुरी च एकपुरी इति कर्मधारयसमासः, ताम् एकपुरीम्।

सन्धिकार्यम् -

- अनन्यशासनामुर्वीम् - अनन्यशासनाम्+उर्वीम्
- शशासैकपुरीमिव - शशास+एकपुरीम्+इव
- **प्रयोगपरिवर्तनम्** - तेन वेलावप्रवलया परिखीकृतसागरा अनन्यशासना उर्वी एकपुरी इव शशासे।

अलङ्कारालोचना - अस्मिन् श्लोके दिलीपस्य राज्यम् अर्थात् समग्रा पृथिवी एकपुर्या उपमितम्। दिलीपराज्यम् अत्र उपमेयम् अस्ति। एकपुरी इति उपमानवाचकं पदम्। इव इति उपमावाचकः शब्दः। यथा नृपाः एकं नगरं शासति तथा दिलीपः सम्पूर्णां धरणीं शासितवान्। अतः अत्र उपमालङ्कारः अस्ति।

पाठगतप्रश्नाः -७

२३. दिलीपः उर्वीं काम् इव शासितवान्।

२४. प्रस्तुते श्लोके उपमालङ्कारं साधयत।

२५. परिखीकृतसागराम् इति रूपं साधयत।

६.९) इदानीं मूलपाठम् अवगच्छाम -

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।

पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।३१।।

अन्वयः - तस्य मगधवंशजा दाक्षिण्यरूढेन नाम्ना अध्वरस्य दक्षिणा इव सुदक्षिणा इति पत्नी आसीत्।

अन्वयार्थः - तस्य राज्ञः दिलीपस्य मगधवंशजा मगधकुले उत्पन्नाः दाक्षिण्यरूढेन औदार्यप्रसिद्धेन नाम्ना अभिधानेन अध्वरस्य यज्ञस्य दक्षिणा दक्षिणानामधेया इव सुदक्षिणा इति सुदक्षिणा इति नाम्ना प्रसिद्धा पत्नी भार्या आसीत्।

सरलार्थः - दिलीपस्य पत्नी सुदक्षिणा मगधवंशे उत्पन्ना आसीत्। सा औदार्यकारणात् यज्ञस्य पत्नी दक्षिणा यथा सुलक्षणा अस्ति तथा आसीत् इति भावः।

तात्पर्यार्थः - अस्मिन् श्लोके दिलीपस्य पत्न्याः सुदक्षिणायाः वर्णनं करोति कालिदासः। अध्वरस्य अर्थात् यज्ञस्य पत्न्याः नाम भवति दक्षिणा। यज्ञस्य अन्ते दक्षिणा प्रदीयते। ताम् अपि यज्ञस्य अङ्गत्वेन कल्पयन्ति जनाः। तेन एव यज्ञः सम्पूर्णः भवति इति अपि अस्ति प्रसिद्धिः। एवं यज्ञस्य सम्पूर्णत्वं साधयति दक्षिणा। मगधवंशे उत्पन्ना सुदक्षिणा दिलीपस्य पत्नी आसीत्। सा च दाक्षिण्यकारणात् अत्यन्तं प्रसिद्धा आसीत्। यथा दक्षिणा यज्ञस्य सम्पूर्णतां साधयति तथा सुदक्षिणा अपि रघुकुलस्य सम्पूर्णतां साधितवती। यतः दिलीपः सुदक्षिणया एव पुत्रलाभं कृतवान्। तेन च पुत्रेण रघुकूलं सम्पूर्णतां प्राप्तवत्। अतः सुदक्षिणां यज्ञस्य सहधर्मिण्या सुदक्षिणया सह उपमाति कविः।

व्याकरणविमर्शः-

- दाक्षिण्यरूढेन - दक्षिणस्य भावः कर्म वा दाक्षिण्यं भवति। रुह्-धातोः क्तप्रत्यये रूढम् इति रूपं सिध्यति। दाक्षिण्येन रूढम् दाक्षिण्यरूढम् इति तृतीयातत्पुरुषसमासः।
- मगधवंशजा - मगधस्य वंशः मगधवंशः इति षष्ठीतत्पुरुषसमासः। मगधवंशे जाता इति अर्थे जन्धातोः डप्रत्यये मगधवंशज इति शब्दः निष्पद्यते। तस्मात् स्त्रीलिङ्गे टापि मगधवंशजा इति रूपम्।
- अध्वरस्य - अविद्यमानः ध्वरः यस्मिन् सः अध्वरः इति नञ्बहुव्रीहिसमासः, तस्य अध्वरस्य। यज्ञस्य इत्यर्थः।

सन्धिकार्यम् -

- सुदक्षिणेत्यासीदध्वरस्येव - सुदक्षिणा+इति+आसीत्+अध्वरस्य+इव
- **प्रयोगपरिवर्तनम्** - तस्य मगधवंशजया दाक्षिण्यरूढेन नाम्ना अध्वरस्य दक्षिणया इव सुदक्षिणया इति पत्न्या अभूयत।

अलङ्कारालोचना - अस्मिन् श्लोके तस्य इति सर्वनामवाचकं पदं दिलीपं बोधयति। स च दिलीपः अध्वरेण अर्थात् यज्ञेन उपमितः। दिलीपस्य पत्नी सुदक्षिणा च यज्ञस्य पत्न्या दक्षिणया उपमिता। इव इति उपमावाचकम् अव्ययं च अत्र वर्तते। अतः अत्र उपमालङ्कारः विद्यते।

पाठगतप्रश्नाः -८

२६. दिलीपपत्नी कस्मिन् वंशे अजायत।

२७. सुदक्षिणा अत्र केन उपमिता।

२८. अध्वरस्य इत्यस्य विग्रहवाक्यं समासनाम च लिखत। कः च अस्य अर्थः।

२९. सुदक्षिणा कस्मिन् देशे उत्पन्ना –

१) मालवे २) मगधे ३) अयोध्यायाम् ४) नन्दीग्रामे

६.१०) इदानीं मूलपाठम् अवगच्छाम -

कलत्रवन्तमात्मानमवरोधे महत्यपि।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः।।३२।।

अन्वयः - वसुधाधिपः अवरोधे महति अपि मनस्विन्या तया लक्ष्म्या च आत्मानं कलत्रवन्तं मेने।

अन्वयार्थः - वसुधाधिपः पृथिव्याः ईश्वरः दिलीपः अवरोधे अन्तःपुरवर्गे महति अपि अधिके अपि मनस्विन्या दृढचित्तया तया सुदक्षिणया लक्ष्म्या च राजश्रिया च आत्मानं स्वं कलत्रवन्तं सभार्यं मेने ज्ञातवान्।

सरलार्थः - दिलीपस्य अन्तःपुरवर्गः महान् आसीत्। तथापि स्वपत्न्या सुदक्षिणया राजलक्ष्म्या च दिलीपः आत्मानं भार्यावन्तं ज्ञातवान्।

तात्पर्यार्थः - प्राचीनकाले प्रायः नृपाणाम् अन्तःपुरवर्गः विशालः भवति स्म। तस्मिन् च अन्तःपुरवर्गे बह्व्यः नार्यः अपि तिष्ठन्ति स्म। तासु च नारीषु काश्चन भार्याः भवन्ति स्म। काश्चन दास्यः अपि भवन्ति स्म। अर्थात् दास्यः अपि नृपस्य भोगवस्तुतुल्याः आसन्। दिलीपः सम्पूर्णस्य जगतः स्वामी आसीत्। अतः स बह्वीः नारीः निजान्तःपुरे स्थापयितुं समर्थः आसीत्। किन्तु धर्मभार्यां विहाय अन्यया नार्या सह सङ्गमः न धर्मसम्मतः। अतः दिलीपः सुदक्षिणा एव मम पत्नी इति चिन्तितवान्। एवं राजलक्ष्म्या सुदक्षिणया च दिलीपः कलत्रवान् आसीत् इति सूच्यते। अनेन तस्य भोगपराङ्मुखत्वं प्रकटीभवति।

व्याकरणविमर्शः -

- कलत्रवन्तम् - कलत्रम् अस्ति यस्य स कलत्रवान्, तं कलत्रवन्तम्। इदं द्वितीयैकवचनान्तं रूपम्।
- मेने - मन्-धातोः लिटि प्रथमपुरुषैकवचने मेने इति रूपं भवति।
- मनस्विन्या - प्रशस्तं मनः अस्ति यस्याः सा मनस्विनी, तया मनस्विन्या।

- वसुधाधिपः - अधिपाति इति अधिपः भवति। वसुधायाः अधिपः वसुधाधिपः इति षष्ठीतत्पुरुषसमासः।

सन्धिकार्यम् -

- कलत्रवन्तमात्मानमवरोधे - कलत्रवन्तम्+आत्मानम्+अवरोधे
- महत्यपि - महति+अपि
- **प्रयोगपरिवर्तनम्** - वसुधाधिपेन अवरोधे महति अपि मनस्विन्या तया लक्ष्म्या च आत्मा कलत्रवान् मेने।

पाठगतप्रश्नाः -९

३०. दिलीपः काभ्यां कलत्रवान् आसीत्।

३१. अनेन श्लोकेन दिलीपस्य कः गुणः सूचितः भवति।

३२. कलत्रवन्तमात्मामवरोधे- इत्यत्र सन्धिविच्छेदं कुरुत।

६.११) इदानीं मूलपाठम् अवगच्छाम -

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
विलम्बितफलैः कालं स निनाय मनोरथैः।।३३।।

अन्वयः - स आत्मानुरूपायां तस्याम् आत्मजन्मसमुत्सुकः विलम्बितफलैः मनोरथैः कालं निनाय।

अन्वयार्थः - स राजा दिलीपः आत्मानुरूपायां आत्मसदृश्यां तस्यां सुदक्षिणायाम् आत्मजन्मसमुत्सुकः पुत्रप्राप्तये उत्कण्ठितः विलम्बितफलैः सविलम्बपरिणामैः मनोरथैः अभिलाषैः कालं समयं निनाय यापयामास।

सरलार्थः - दिलीपः आत्मसदृश्यां दक्षिणायां पुत्रलाभः भवतु इति इष्टवान्। किन्तु बहुकाले व्यतीते अपि तस्य पुत्रलाभः न भवति स्म इति विलम्बकारणात् स दुःखितः आसीत्।

तात्पर्यार्थः - सुदक्षिणा दिलीप इव क्षत्रियकुले उत्पन्ना आसीत्। दिलीप इव तस्याः बहवः गुणाः अपि आसन्। अतः यदि सुदक्षिणायाः गर्भे पुत्रोत्पत्तिः भवति तर्हि स पुत्रः यथार्थः रघुवंशीयः भविष्यति। तस्मिन् च तनये राजोचिताः गुणाः अवश्यं भविष्यन्ति। अतः सुदक्षिणायाम् पुत्रजन्म भवतु इति दिलीपस्य इच्छा आसीत्। किन्तु विवाहात् परं बहूनि वर्षाणि व्यतीतानि। तथापि दिलीपस्य पुत्रलाभः न

अभवत्। पुत्रः न जायते चेत् पितृणं न पूर्यते। तेन पापम् एव सम्भविष्यति। अतः दिलीपः अतीव चिन्ताकुलः आसीत्। एवं पुत्रस्य अभावेन दिलीपः दुःखाक्रान्तः भूत्वा कालयापनम् अकरोत्।

व्याकरणविमर्शः -

- आत्मानुरूपायाम् - आत्मनः अनुरूपा आत्मानुरूपा इति षष्ठीतत्पुरुषसमासः, तस्याम् आत्मानुरूपायाम्।
- आत्मजन्मसमुत्सुकः - आत्मनो जन्म यस्य स आत्मजन्मा इति व्यधिकरणबहुव्रीहिसमासः। अथवा आत्मनः जन्म आत्मजन्मा इति षष्ठीतत्पुरुषसमासः। आत्मजन्मनि समुत्सुकः आत्मजन्मसमुत्सुकः इति सप्तमीतत्पुरुषसमासः।
- विलम्बितफलैः - विलम्बः सञ्जातः अस्य इत्यर्थे विलम्बितम् इति भवति। विलम्बितं फलं येषां ते विलम्बितफलाः इति बहुव्रीहिसमासः, तैः विलम्बितफलैः।
- निनाय - प्रापणार्थकस्य नीधातोः लिटि प्रथमपुरुषैकवचने निनाय इति रूपम्।

सन्धिकार्यम् -

- तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः - तस्याम्+आत्मानुरूपायाम्+आत्मजन्मसमुत्सुकः
- **प्रयोगपरिवर्तनम्** - तेन आत्मानुरूपायां तस्याम् आत्मजन्मसमुत्सुकेन विलम्बितफलैः मनोरथैः कालः निन्ये।

पाठगतप्रश्नाः -१०

३३. दिलीपः कथं कालं यापितवान्।

३४. दिलीपः कस्याम् आत्मजन्मसमुत्सुकः आसीत्।

३५. आत्मजन्मसमुत्सुकः इत्यस्य विग्रहवाक्यं समासनाम च लिखत।

६.१२) इदानीं मूलपाठम् अवगच्छाम -

सन्तानार्थाय विधये स्वभुजादवतारिता।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे।।३४।।

अन्वयः - तेन सन्तानार्थाय विधये स्वभुजात् अवतारिता जगतो गुर्वी धूः सचिवेषु निचिक्षिपे।

अन्वयार्थः - तेन दिलीपेन सन्तानार्थाय सन्तानप्रयोजनाय विधये अनुष्ठानाय स्वभुजाद् निजहस्तात् अवतारिता अर्पिता जगतः लोकस्य गुर्वी दुर्वहा धूः भारः सचिवेषु मन्त्रिषु निचिक्षिपे निक्षिप्ता।

सरलार्थः - पुत्रप्राप्तये दिलीपः शास्त्रविहितम् अनुष्ठानादिकं कर्तुम् इष्टवान्। अतः स समग्रस्य जगतः भारं मन्त्रिभ्यः समर्पितवान्।

तात्पर्यार्थः - विवाहात् परं बहुवर्षाणि व्यतीतानि आसन्। तथापि दिलीपः सन्तानरहितः आसीत्। तस्मात् दैवम् एव आश्रयणीयम् इति विचिन्त्य शास्त्रविहितम् अनुष्ठानादिकं कर्तुम् इष्टवान्। किन्तु अनुष्ठानं क्रियते चेत् राज्यचालनं न भविष्यति। यतो हि अनुष्ठानादिकं विधातुं बहुकालः अपेक्षितः भवति। अतः दिलीपः समग्रस्य जगतः भारं मन्त्रिभ्यः अर्पितवान्। कारणं सम्पूर्णम् एव जगत् दिलीपस्य शासनाधीनम् आसीत्। यद्यपि प्रजापालनम् एव नृपस्य प्रमुखं कर्तव्यं भवति। तथापि दिलीपः सन्तानलाभाय तत् कर्तव्यं परित्यक्तवान्। यतो हि सन्तानेन एव पितॄणं पूरयितुं शक्यते। एवं राज्यपरिचालनां परित्यज्य पुत्रलाभाकाङ्क्षी दिलीपः धर्माचरणं कर्तुम् उद्यतः आसीत्।

व्याकरणविमर्शः -

- सन्तानार्थाय - सन्तानः अर्थः यस्य स सन्तानार्थः इति बहुव्रीहिसमासः, तस्मै सन्तानार्थाय। अथवा सन्तानाय अयम् सन्तानार्थः इति चतुर्थीतत्पुरुषसमासः, तस्मै सन्तानार्थाय।
- विधये - विधीयते इति विधिः भवति। अनुष्ठानम् इत्यर्थः।
- स्वभुजाद् - स्वस्य भुजः स्वभुजः इति षष्ठीतत्पुरुषसमासः, तस्मात् स्वभुजात्।
- अवतारिता - अवपूर्वकात् तृधातोः णिचि क्तप्रत्यये स्त्रियां टापि च अवतारिता इति रूपम्।
- गुर्वी - गुरुशब्दस्य स्त्रियां ङीपि गुर्वी इति रूपम्।
- निचिक्षिपे - निपूर्वकस्य क्षिप्-धातोः लिटि कर्मणि प्रथमपुरुषैकवचने निचिक्षिपे इति रूपम्। निक्षिप्तवान् इति अर्थः।

सन्धिकार्यम् -

- स्वभुजादवतारिता - स्वभुजात्+अवतारिता
- धूर्जगतो गुर्वी - धूः+जगतः+गुर्वी
- **प्रयोगपरिवर्तनम्** - स सन्तानार्थाय विधये स्वभुजात् अवतारितां जगतः गुर्वीं धूं सचिवेषु निचिक्षेप।

पाठगतप्रश्नाः -११

३६. जगतः धूः कथम् आसीत्।

३७. सन्तानार्थाय इत्यत्र अर्थशब्दस्य कः अर्थः।

३८. निचिक्षिपे इति रूपं कस्य धातोः कस्मिन् च लकारे।

पाठसारः

महाराजः दिलीपः प्रजावत्सलः आसीत्। यतो हि प्रजानां शिक्षाव्यवस्थां रक्षणं पोषणम् इत्यादिकं सर्वं स पश्यति स्म। एवं पितृकार्यकरणात् दिलीपः एव प्रजानां पिता आसीत् इति कविः वर्णितवान्। तासां प्रकृतपितरः तु जन्मकारणानि एव आसन्। लोकहिताय स दण्डनीयान् दण्डयति स्म न तु धनसंग्रहाय। एवं सन्तानलाभाय स विवाहं कृतवान् न तु भोगाय। एवं तस्य अर्थकामसाधनं धर्ममेव असाधयत्। देवराजेन इन्द्रेण सह तस्य मित्रता आसीत्। दिलीपः पृथिव्याः करं संगृह्य यज्ञादिकं सम्पादितवान्। इन्द्रः च वर्षणेन धरणीं सस्यायितां कृतवान्। एवम् उभौ सम्पद्विनिमयेन भुवनद्वयं पोषितवन्तौ। अन्ये नृपाः महायशस्विनः तस्य कीर्तिम् न अनुकृतवन्तः। यतो हि दिलीपस्य राज्ये तस्करताशब्दः श्रुतौ एव आसीत्। तस्य शत्रुः अपि सच्चरित्रशाली चेत् तेन ग्राह्यः आसीत् यथा रोगिणा रुचिरहितम् अपि औषधं ग्राह्यं भवति। आत्मीयः अपि दुष्टः भवति चेत् तेन त्याज्यः आसीत् यथा सर्पदष्टा अङ्गुली अभीष्टा अपि त्यक्तव्या भवति। ब्रह्मा तं महाभूतकारणसामग्रीभिः निर्मीतवान्। अतः तस्य सर्वे गुणाः परार्थैकफलाः आसन्। समग्रा पृथिवी एव तस्य शासनाधीना आसीत्। अतः एव तस्य राज्यस्य परिखा समुद्रः आसीत्। समुद्रतटः च राज्यस्य प्राकारतुल्यः आसीत्। एवं स समग्रां पृथिवीम् एकनगरीम् इव शासितवान्। तस्य पत्नी आसीत् मगधकुले उत्पन्ना सुलक्षणा सुदक्षिणा। सा यज्ञस्य पत्नी दक्षिणा इव औदार्यकारणात् प्रसिद्धा आसीत्। स सम्पूर्णायाः पृथिव्याः स्वामी आसीत्। तथापि स धर्मभार्यया सुदक्षिणया राजलक्ष्म्या च आत्मानं कलत्रवन्तं ज्ञातवान्। तस्यां निजसदृश्यां सुदक्षिणायां पुत्रजन्म भवतु इति तस्य इच्छा आसीत्। यतो हि सुदक्षिणा अपि क्षत्रियोकुलोत्पन्ना आसीत्। अतः तस्याम् उत्पन्नः पुत्रः अवश्यं राजगुणोचितः भविष्यति इति स चिन्तितवान्। किन्तु विवाहात् परं बहुवर्षाणि व्यतीतानि। तथापि तयोः सन्तानलाभः न अभवत्। अतः दिलीपः दुःखाक्रान्तः आसीत्। तस्मात् सन्तानलाभाय शास्त्रनिर्दिष्टम् अनुष्ठानं विधातुं स राज्यभारं मन्त्रिभ्यः समर्पितवान्।

पाठान्तप्रश्नाः

१. दिलीपस्य अर्थसाधनं कामसाधनं च धर्मम् एव साधयति - विचारयत।

२. द्वेष्योपि सम्मतः इत्यादिश्लोके उपमालङ्कारं साधयत।

३. कथं दिलीपः प्रजानां पिता अभवत्।

४. दिलीपदेवेन्द्रौ कथं लोकद्वयं पोषितवन्तौ।

५. दिलीपस्य सर्वे गुणाः कथं परार्थैकफलाः।

६. कलत्रवन्तम् इत्यादिश्लोकम् आश्रित्य दिलीपस्य भोगपराङ्मुखत्वं विचारयत।

७. दिलीपः कथं राज्यभारं मन्त्रिभ्यः समर्पितवान्।

८. समासेन पाठसारं लिखत।

९. स्तम्भयोः लिखितान् परस्परसम्बद्धान् मेलयत।

स्तम्भः-क	स्तम्भः-ख
१. दुदोह	१. अनुकृतवन्तः
२. दधतुः	२. पृथिवी
३. अनुययुः	३. स्वर्गलोकम्
४. तस्कर	४. उरगक्षता अङ्गुली
५. दिलीपः	५. दुग्धवान्
६. इन्द्रः	६. औषधम्
७. दुष्टः प्रि	७. मगधवंशजा
८. शिष्टः शत्रुः	८. पुपुषतुः
९. सुदक्षिणा	९. चौर्यवृत्तिः

उत्तरम् - १-५, २-८, ३-१, ४-९,५-२, ६-३, ७-६, ८-४, ९-७.

पाठगतप्रश्नानाम् उत्तराणि-

उत्तराणि-१

१. दिलीपः शिक्षाकारणात् रक्षणात् भरणात् च दिलीपः प्रजानां पिता।

२. जनानां पितरः जन्मकारणानि आसन्।

३. विनयस्य आधानं विनयाधानम् इति षष्ठीतत्पुरुषसमासः, तस्मात् विनयाधानात्।

४. ३

५. दिलीपः दण्ड्यान् स्थित्यै दण्डितवान्।

६. दिलीपस्य अर्थकामौ धर्म एव आसीत्।

उत्तराणि-२

७. दण्डयत् इति अत्र प्रातिपदिकम्। इदं रूपं षष्ठीविभक्तेः एकवचने भवति।

८. १

उत्तराणि-३

९. दिलीपः यज्ञाय पृथिवीं दुग्धवान्।

१०. भुवनद्वयं नाम स्वर्गलोकः पृथिवीलोकः च।

११. दुदोह इति रूपं दुह्-धातोः लिट्लकारे भवति।

१२. ४

उत्तराणि-४

१३. दिलीपस्य राज्ये तस्करता श्रुतौ आसीत्।

१४. अनु-पूर्वकात् याधातोः लिटि प्रथमपुरुषबहुवचनविवक्षायां अनुययुः इति रुपम्। अनुकृतवन्तः इत्यर्थः।

१५. किल+अनुययुः+तस्य

उत्तराणि-५

१६. दिलीपस्य शत्रुः अपि शिष्टः चेत् औषधवत् ग्राह्यम् आसीत्।

१७. दिलीपस्य आत्मीयः अपि दुष्टः चेत् उरगक्षता अङ्गुली इव त्याज्यः आसीत्।

१८. प्रियः+अपि+आसीत्+अङ्गुली+इव+उरगक्षता

१९. २

उत्तराणि-६

२०. ब्रह्मा दिलीपं पञ्चमहाभूतसामग्रीभिः सृष्टवान्। अतः दिलीपस्य सर्वे गुणाः परार्थैकफलाः।

२१. विपूर्वकात् धाधातोः लिटि प्रथमपुरुषैकवचने विदधे इति रूपम्।

२२. महान्ति च तानि भूतानि महाभूतानि इति कर्मधारयसमासः। महाभूतानां समाधिः महाभूतसमाधिः इति षष्ठीतत्पुरुषसमासः, तेन महाभूतसमाधिना।

उत्तराणि-७

२३. दिलीपः उर्वीम् एकपूरीम् इव शासितवान्।

२४. अस्मिन् श्लोके दिलीपस्य राज्यम् अर्थात् समग्रा पृथिवी एकपुर्या उपमितम्। दिलीपराज्यम् अत्र उपमेयम् अस्ति। एकपुरी इति उपमानवाचकं पदम्। इव इति उपमावाचकः शब्दः। यथा नृपाः एकं नगरं शासति तथा दिलीपः सम्पूर्णां धरणीं शासितवान्। अतः अत्र उपमालङ्कारः अस्ति।

२५. अपरिखाः परिखाः यथा सम्पद्यन्ते तथा कृताः इति विग्रहे च्विप्रत्यये परिखीकृताः इति रुपम्। परिखीकृताः सागराः यस्याः सा परिखीकृतसागराः इति बहुव्रीहिसमासः, तां परिखीकृतसागराम्।

उत्तराणि-८

२६. दिलीपपत्नी मगधवंशे अजायत।

२७. सुदक्षिणा अत्र दक्षिणया उपमिता।

२८. अविद्यमानः ध्वरः यस्मिन् सः अध्वरः इति नञ्बहुव्रीहिसमासः, तस्य अध्वरस्य। यज्ञस्य इत्यर्थः।

२९. २

उत्तराणि-९

३०. दिलीपः सुदक्षिणाराजलक्ष्मीभ्यां कलत्रवान् आसीत्।

३१. अनेन श्लोकेन दिलीपस्य भोगपराङ्मुखत्वं सूच्यते।

३२. कलत्रवन्तम्+आत्मानम्+अवरोधे

उत्तराणि-१०

३३. दिलीपः विलम्बितफलैः मनोरथैः कालं यापितवान्।

३४. दिलीपः आत्मानुरूपायां सुदक्षिणायाम् आत्मजन्मसमुत्सुकः आसीत्।

३५. आत्मनो जन्म यस्य स आत्मजन्मा इति व्यधिकरणबहुव्रीहिसमासः। अथवा आत्मनः जन्म आत्मजन्मा इति षष्ठीतत्पुरुषसमासः। आत्मजन्मनि समुत्सुकः आत्मजन्मसमुत्सुकः इति सप्तमीतत्पुरुषसमासः।

उत्तराणि-११

३६. जगतः धूः गुर्वी आसीत्।

३७. सन्तानार्थाय इत्यत्र अर्थशब्दस्य अर्थः प्रयोजनम्।

३८. निपूर्वकस्य क्षिप्-धातोः लिटि कर्मणि प्रथमपुरुषैकवचने निचिक्षिपे इति रूपम्।

॥ इति षष्ठः पाठः ॥